श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री अम्मासत्रं शेषाद्र्याचार्य विरचितं

# ॥ श्री गोपालार्यमहादेशिकमङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गोपालार्यमहादेशिकमङ्गळम् ॥

वेदान्त लक्ष्मणमुनिं श्रीहयास्यस्वरूपिणम्।
अण्णयार्यपदाम्भोजभृङ्गं मद्गुरुमाश्रये॥

ज्ञानानुष्ठानवैराग्यनिधये गुणसिन्धवे।
त्रय्यन्तदेशिकायास्तु गोपालार्याय मङ्गळम्॥ 1 ॥

विक्रमे कन्यकामासि पूर्वाषाढे गुणोत्तरे।
आत्रेयकुलतुङ्गाब्धौ अवतीर्णाय मङ्गळम्॥ 2 ॥

त्रय्यन्तलक्ष्मणमुनेः यतिशेखररूपिणः।
लब्धागमान्तयुग्माय गोपालार्याय मङ्गळम्॥ 3 ॥

कुम्भघोणाख्यनगरं शार्ङ्गराजनिषेवितम्।
यन्नित्यवासतो दिव्यधामभूत् तस्य मङ्गळम्॥ 4 ॥

श्रीशठारियतीशानदेशिकांशतया ह्ययम्।
संरक्षणायावतीर्णः इत्युक्तायास्तु मङ्गळम्॥ 5 ॥

श्रीनाथयामुनाचार्य लक्ष्मणार्यमुनित्रयम्।
अंशेन यतितां प्राप्य यं श्रितं तस्य मङ्गळम्॥ 6 ॥

रहस्यत्रयसाराब्धि मन्थनोत्थसुधामयी।
येन सारास्वादिनी सा रचिता तस्य मङ्गळम्॥ 7 ॥

सर्वचेतनसर्वार्थ सिद्धिदो येन निर्मितः।
निक्षेपचिन्तामणिराट् तस्मै सेव्याय मङ्गळम्॥ 8 ॥

आह्निक ध्यानसोपान दशनिर्णयकारिणे।
हृत्पद्मस्थश्रीहयास्य पदहंसाय मङ्गळम्॥ 9॥

त्रयी चूडार्यनाम्नां यः सहस्रमकरोद्गुरुः।
विष्णुचित्तादिगाथार्थ दायिनस्तस्य मङ्गळम्॥ 10॥

यत्सम्प्रदायनिष्णाताः ज्ञानानुष्ठानराशयः।
पवित्रयन्ति गुरवो लोकांस्तस्यास्तु मङ्गळम्॥ 11॥

यशस्सत्कार लाभेच्छा वर्जितो भगवज्जने।
नित्यदासो निर्ममो यः सर्वज्ञस्तस्य मङ्गळम्॥ 12॥

गार्हस्थ्ये प्राप्तवेदान्त परमैकान्तिनां मुदे।
चरमे हंसतां प्रातो यस्तस्मै मङ्गळं सदा॥ 13॥

यो कीर्तयन्ति शेषाद्रिवर्योक्तं मङ्गळं त्विदम्।
तेषां नित्यमङ्गळं स दद्यात् गोपालदेशिकः॥ 14॥

मुनित्रय नमस्कृते निखिललोक सञ्जीवन -
    त्रयीमकुट देशिक प्रवर दिव्य रूपे गुरौ।
उदारगुणसागरे कलितमिस्रहृत्भास्करे
    रतिर्मम सदा भवत्वमितभूम्नि गोपालके॥ 15॥

श्रीमान् गोपालसूरिर्हयवदन कृपा -
    लम्भिताश्चर्यभूमा -
प्रज्ञाचारित्रशान्तिप्रभृति कुसुमस -
    न्तानकल्पद्रुमः स्तात्।
त्रय्यन्तार्यावतारः सकलनतजनो -
    ज्जीवने बद्ध दीक्षः

यच्छन् त्रिभ्यो मुनिभ्यो श्रुतिमकुटगुरोः
संप्रदायं श्रियै नः ॥ 16 ॥

श्रीमुनित्रय सिद्धान्त पद्मिन्युल्लासभास्करः।
गोपालदेशिकः श्रीमान् जेजीयात् सन्ततं भुवि ॥ 17 ॥

॥ इति श्री गोपालार्यमहादेशिकमङ्गळं समाप्तम् ॥